# Shivaprokta Kanchikshetraprashastih

# શિવપ્રોક્તા કાઞ્ચીક્ષેત્રપ્રશસ્તિઃ

## Document Information

Text title : Shivaprokta Kanchikshetraprashastih

File name : shivaproktAkAnchIkShetraprashastiH.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 20| 1-18||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તા કાઞ્ચીક્ષેત્રપ્રશસ્તિઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
- શિવપાર્તવતીસંવાદે -
શ્રીશિવ ઉવાચ
દેવિ કાઞ્ચીપુરી કાચિદ્યત્ર વેગવતી નદી ।
તત્ર વાસમપેક્ષન્તે નિત્યં બ્રહ્માદયઃ સુરાઃ ॥ ૧॥

એકામ્રેશા(એકામ્બરા)ભિધં લિઙ્ગં તત્રાસ્ત્યેકં મદાત્મકમ્ ।
તદ્દર્શનેન પાપાનિ વિનશ્યન્તિ ક્ષણાદિવ ॥ ૨॥

કોટિતીર્થાભિધં તીર્થં તત્રાસ્ત્યેકમઘાપહમ્ ।
તત્રૈવ મજ્જનાદેવ બ્રહ્મહત્યા વિમુચ્યતે ॥ ૩॥

તત્ર શ્રાદ્ધં વિધાનેન કર્તવ્યં પિતૃમુક્તયે ।
તર્પણીયાશ્ચ પિતરઃ કોટિતીર્થોદકૈઃ શુભૈઃ ॥ ૪॥

કોટિતીર્થે નરઃ સ્નાત્વા સમ્પૂજ્યૈકામ્બરેશ્વરમ્ ।
મુચ્યતે સર્વથા દેવિ બ્રહ્મહત્યાઽયુતૈરપિ ॥ ૫॥

તત્રૈવ મામુપાશ્રિત્ય ઋષયો બ્રહ્મવાદિનઃ ।
વસન્તિ બહવસ્તેષાં સઙ્ખ્યા કર્તું ન શક્યતે ॥ ૬॥

તત્ર માં પ્રત્યહં વિષ્ણુબ્રહ્માદ્યાઃ સુરસત્તમાઃ ।
કુર્વન્તિ પૂજનં ભક્ત્યા ત્રિકાલં સર્વસાધનૈઃ ॥ ૭॥

પ્રદોષસમયે વિષ્ણુર્મામભ્યર્ચ્ય વિધાનતઃ ।
સેવાં કરોતિ સાનન્દં મૃદઙ્ગમભિવાદયન્ ॥ ૮॥

વિવિધૈઃ કુસુમૈર્નૂત્નૈર્બિલ્વપત્રૈશ્ચતુર્મુખઃ ।
મામભ્યર્ચ્ય તતઃ સાયં તોલાન્વાદયતે મુદા ॥ ૯॥

વાગ્દેવી વલ્લકીં ધૃત્વા સાયમભ્યર્ચ્ય માં શિવમ્ ।

કરોતિ ગાનમમલં ગીતશાસ્ત્રવિશારદા ॥ ૧૦॥

ઇન્દ્રઃ સમ્પૂજ્ય માં સાયં બિલ્વપત્રાદિભિર્મુદા ।
કરોતિ વૈણવં વાદ્યં તત્તદ્રન્ધ્રનિષેવણાત્ ॥ ૧૧॥

શચી નૃત્યં કરોત્યગ્રે સાયમન્વહમાદરાત્ ।
રમ્ભાદ્યૈરપ્સરોભિશ્ચ સહિતા મમ તુષ્ટયે ॥ ૧૨॥

લક્ષ્મીઃ સાયં સમભ્યર્ચ્ય સ્વર્ણવચ્ચામરદ્વયમ્ ।
ગૃહીત્વા તવ પાર્શ્વસ્થા ભવતીમુપસેવતે ॥ ૧૩॥

દેવપત્ન્યસ્તથાઽન્યાશ્ચ સાયં સમ્પૂજ્ય માં શિવમ્ ।
વિષ્ણુબ્રહ્માદિદેવાનાં પત્ન્યો યાસ્તાસ્તુ શૈલજે ॥ ૧૪॥

તવ દાસ્યસ્તનસ્તાસ્તે સેવાં કુર્વન્તિ સાદરમ્ ।
કામાક્ષીરૂપમાસાદ્ય ત્વયા તત્ર મનોરમે ॥ ૧૫॥

સ્થીયતે સતતં ત્વં તુ દેવદેવાઙ્ગનાર્ચિતા ।
કુબેરેણ પુરા તત્ર રત્નસ્તમ્ભવિરાજિતમ્ ॥ ૧૬॥

શિવસ્થાનં કૃતં રમ્યં રત્નગોપુરરાજિતમ્ ।
પઞ્ચક્રોશમિતં ચક્રે (યત્ર) હેમપ્રાકારમુત્તમમ્ ॥ ૧૭॥

ચક્રે પ્રાકારશૃઙ્ગાણિ શ્રેષ્ઠરત્નમયાનિ સઃ ।
સ્થીયતે તત્ર સતતં મયા રત્નશિવાલયે ॥ ૧૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તા કાઞ્ચીક્ષેત્રપ્રશસ્તિઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૦। ૧-૧૮॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 20 . 1-18..

Notes:
Śiva શિવ describes to Pārvatī પાર્વતી about the Kañcīpurī કાઞ્ચીપુરી / Kañcīkṣetra કાઞ્ચીક્ષેત્ર, that is also an Abode to the Ekāmreśvara / Ekāmbareshvara Śivaliṅga એકામ્રેશ્વર / એકામ્બરેશ્વર શિવલિઙ્ગ. He tells Her about the significance of Koṭitīrtha કોટિતીર્થ, especially w.r.t Pitṛtarpaṇa પિતૃતર્પણ. Śiva શિવ further tells Her about Her temple where She is worshiped as Kāmākṣī કામાક્ષી.

Proofread by Ruma Dewan

*Shivaprokta Kanchikshetraprashastih*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*